| | | |
|---|---|---|
| (1) Deception. | जालं कपटेऽप्युक्तं[1] कपालमुक्तं घटादिशकलेऽपि[1] । | (1) A fragment of earthen pot. |
| (1) Sin. (2) Misfortune. | रिष्टं पापा[1]शुभयो[2]ररिष्टमशुभेऽपि[1] निर्दिष्टम् ॥८०४॥ | (1) Misfortune. |
| (1) Diffusion. | व्यासेऽपि[1] विग्रहः स्यान्मानविशेषेऽपि[1] पौरुषव्यामौ । | (1) Measure. |
| Resolution. | हेला प्रस्तावेऽपि[1] प्रग्रह आबन्धनेऽप्युक्तः[1] ॥८०५॥ | Captive, prisoner. |
| (1) An elephant's trunk. | कुञ्जरकरेऽपि[1] शुण्डा[a] ग्रावा शैले[1] भवश्च संसारे[1] । | (1) A mountain. (1) The world. |
| (1) Young. | बालेऽपि[1] बालिशः स्यात्कलधौतं शातकुम्भेऽपि[1] ॥८०६॥ | (1) Gold. |
| Branch. | शाखायामपि[1] परिधिर्वसतिर्जैनाश्रमेऽपि[1] निर्दिष्टा । | A Jain monastery. |
| (1) Searching. | अन्वेषणेऽपि[1] मार्गो भद्रो[b] वृषभे[1] वके[1] ध्वाङ्क्षः ॥८०७॥ | (1) A bull. (1) A crane. |
| (1) A defect in a jewel. | मणिदोषेऽपि[1] त्रासो वत्सः संवत्सरेऽपि[1] निर्दिष्टः । | (1) A year. |
| (1) Adverse. | वामः प्रतिकूलेऽपि[1] प्रोक्तौ शुक्लेऽपि[1] शुचिरामौ ॥८०८॥ | (1) White, bright. |
| (1) Yesterday. | ह्यस्तनदिनेऽपि[1] कल्यं नेत्रं मूले[1] रजस्यपि परागः । | (1) Dust, powder. |
| (1) Pregnant. | भ्रूणो गर्भिण्यामपि[1] भूतिर्विभवे[1] बलः[c] काके ॥८०९॥ | (1) Grandeur. (1) A crow. |
| (1) A tableland. | गिरिसानुन्यपि वप्रं[1] तल्पं दारेषु[1] चक्षुषि[1] ज्योतिः । | (1) A wife. (1) Eye. |
| (1) Injuring by theft. | चौर्यादावपि[1] हिंसा प्रसरः प्रणयेऽपि[1] निर्दिष्टः ॥८१०॥ | (1) Affectionate solicitation. |
| Group, mass. | संघातेऽपि[1] ग्रामो भूतेन्द्रियशब्द[1]विषयकरणानाम्[1] । | (1) The complex of visible objects. (1) Senses. |
| Combined with names of trees it signifies a multitude. | षण्डश्च[d] पादपानां[1] स्कन्धः करिनरतुरङ्गाणाम्[1] ॥८११॥ | (1) Signifying a multitude after. करि, नर and तुरङ्ग । |
| 10 Different kinds of trees. | नन्द्यावर्तः[1] सरलः[e] शालः[1] काको[1] धवो[1]ऽञ्जनस्[1]तिलकः[1] । | |
| | पद्म[1]स्पन्दन[1]मोक्षा[1] वृक्षविशेषेऽपि दृश्यन्ते ॥८१२॥ | |
| Fragrant. | कटुतिक्तकषायास्तु सौरभ्येऽपि[1] प्रकीर्तिताः । | |
| Splendour, elegance, beauty. | शोभार्थेऽपि[1] प्रयुज्यन्ते लक्ष्मीश्रीकान्तिविभ्रमाः ॥८१३॥ | |

a सुंडा b रुद्रो वृषभे c बलः काले, वलिः काके, वलिकाले d खंड पादानां e सरलः शालः शाकोयवार्जुनतिलकः, सरलः शाकोयवार्जुनस्तिलकः, सरलः शालः शाको धवोऽञ्जनस्तिलकः ।